# आदर्शप्रश्नपत्रम् सं. 2
# (संस्कृतकेन्द्रिकम्)
# कोड संख्या – 322
# कक्षा द्वादशी

## खण्डः 'क' Section A
## अपठितांशावबोधनम् Reading -Comprehension

**10**

1. **अधोलिखितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत**
**निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए।**
**Read the following passage and answer the questions.**

एकदा महात्मागांधिः लेखनकार्ये व्यस्तः आसीत्। लेखन्यां मसी समाप्ता जाता। सः तां लेखनीं तत्रैव स्थापयित्वा अन्यत्र गतवान्। पुनः आगत्य लेखनीम् अपश्यत्। पार्श्वे स्थितः आश्रमवासी अवदत्–बापू! तस्यां मसी न आसीत् अतः मया लेखनी बहिः प्रक्षिप्ता। महात्मागान्धिः अवदत्–किमपि वस्तु क्षुद्रं मूल्यरहितं न भवति। किम् अस्माकं देशः तादृशं धनस्य अपव्ययं कर्तुं शक्नोति? नैव। गच्छतु भवान् ताम् एव लेखनीम् आनयतु। तस्यामेव मसीं पूरयित्वा कार्यं करिष्यामि इति।

यदि वयं सर्वे अपि देशस्य धनविषये तथा जागरूकाः भवामः तर्हि देशस्य दारिद्र्यम् अचिरादेव दूरी–भवेत्। अस्माकम् आवश्यकतानुसारमेव अस्माकं समीपे धनं, वस्त्राणि अन्यानि च वस्तूनि भवेयुः एष एव योगस्य प्रमुखाः नियमः।

**प्रश्नाः**

I. **एकपदेन उत्तरत**
**एक पद में उत्तर दीजिए।**
**Answer in one word only.** ½ × 4 = 2

(i) अस्माकं देशः कस्य अपव्ययं कर्तुं न शक्नोति?

(ii) कः महात्मनः पार्श्वे स्थितः?

(iii) लेखन्यां का समाप्ता जाता?

(iv) मसीरहितां लेखनीम् आश्रमवासी कुत्र अक्षिपत्?

II. **पूर्णवाक्येन उत्तरत**
**संस्कृत के पूर्णवाक्य में उत्तर दीजिए।**
**Answer in one sentence.** 1 × 2 = 2

(i) योगस्य प्रमुखः नियमः कः?

(ii) आश्रमवासिना महात्मनः लेखनी किमर्थं क्षिप्ता?

III. **निर्देशानुसारं प्रश्नान् उत्तरत**

**निर्देश के अनुसार प्रश्नों के उत्तर दें।**

**Do as directed** 1× 4 = 4

(i) ''किमपि वस्तु क्षुद्रं मूल्यरहितं न भवति''इत्यस्मिन् वाक्यांशे ''क्षुद्रम्''इति पदं कस्य विशेषणम्? 1

(ii) ''गच्छतु भवान्, ताम् एव आनयतु'' इत्यस्मिन् वाक्ये ''आनयतु'' इति क्रियापदस्य कर्ता कः? 1

(iii) ''अन्तः'' इति पदस्य कः विलोमः अत्र प्रयुक्तः? 1

(iv) ''शीघ्रमेव'' इत्यस्य कः पर्यायः अत्र प्रयुक्तः? 1

IV. **अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।** 2

**इस गद्यांश के लिए समुचित शीर्षक लिखिए।**

**Please give a suitable title to this paragraph.**

## खण्डः 'ख'

## Section B **15**

## संस्कृतेन रचनात्मकं कार्यम्

## Writing Skill in Sanskrit

2. **कानपुरनिवासी आलोकः कोलकातानिवासिनम् अपूर्वनामानम् स्वमित्रम् एकं पत्रम्अलिखत्। वस्तुतः आलोकः एकस्यां सामान्यज्ञानप्रतियोगितायां प्रतिभागिताम् अकरोत्, येन तस्य व्यक्तित्वे अतीव परिवर्तनं जातम्। अस्मिन् पत्रे म जूषातः उचितपदैः रिक्तस्थानानि पूरयित्वा पत्रं पुनःलिखत।**

**कानपुर निवासी आलोक ने कोलकाता निवासी अपूर्व नामक अपने मित्र को एक पत्र लिखा। वस्तुतः आलोक ने एक सामान्यज्ञान प्रतियोगिता में भाग लिया था जिससे उसके व्यक्तित्व में बहुत परिवर्तन हुआ। उसके द्वारा लिखे पत्र में म जूषा में दिए पदों में से उचित पद ले कर खाली स्थान भरते हुए पत्र को पुनः उत्तर पुस्तिका में लिखिए।**

**Aloka, a resident of Kanpur, wrote a letter to his friend Apoorva, living in Calcutta Actually Aloka had just participated in a "General Knowlege Quiz Competition', which brought about remarkable change in his personality. File in the blanks in the following letter and rewrite it in your answer sheet (select the words from the box.)**

½ × 10=5

प्रिय ———————(ii)

——————————(i)

तिथिः ——————————

सप्रेम नमस्ते।

अत्र कुशलं तत्रास्तु। आशासे यदिमं समाचारं प्राप्य भवान् प्रसन्नो भविष्यति यत् अस्माकं नगरे आयोजितायाम् अन्तर्विद्यालयसामान्यज्ञानप्रतियोगितायां मया विद्यालयस्य ————————————————(iii) कृतम्, प्रथमपुरस्कारः च जितः। इयं प्रतियोगिता अस्माकम् एव विद्यालये समायोजिता। अस्याम् नगरस्य विविधविद्यालयेभ्यः त्रिंशत् प्रतिभागिनः आगच्छन्। अस्यै प्रतियोगितायै अहं पूर्वमेव विविधपुस्तकानाम् अध्ययनम्—————————(iv) ।

अस्यां प्रतियोगितायां मया पुरस्कारः एव न जितः स्वविद्यालयस्य पित्रोश्च गौरवमेव न —————————(v) अपितु अन्ये अनुभवाः अपि महत्त्वपूर्णाः आसन् यथाहि अन्यसहभागिभिः सह संभाषणं, म चस चालनं, प्रस्तुतीकरण च। अपि च परिश्रम–आत्मविश्वास–सहयोगादीनां गुणानां ————————— (vi) मम व्यक्तित्वे पि——— ———————(vii) परिवर्तनं जातम्।

मम अनुरोधः अस्ति यत् भवानपि ———————— (viii) प्रतियोगितासु प्रतिभागी भवतु। सर्वेभ्यः यथायोग्यम् अभिवादनम्।

भवदीयः सुहृद्

---------------(ix)

वेष्टनम्

| |
|---|
| श्रीमान् अपूर्व घोषः<br>52 बालीग जः, कोलकाता<br>————————— (x) |

**म जूषा**

| |
|---|
| विकासेन, वर्धितम्, अभूतपूर्वम्, अपूर्व! कानपुरतः अकरवम्, आलोकः, पश्चिमबंगालप्रदेशः, एतादृशीसु, प्रतिनिधित्वम् |

**3. प्रदत्तसूचीसाहाय्येन अधोदत्तां कथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।**

½ ×10= 5

**म जूषा में दिए गए शब्दों की सहायता से निम्नलिखित लघुकथा को भर कर उत्तर पुस्तिका में पुनः लिखिए।**

**Please fill in the blanks in the following story and rewrite it in your answer sheet with the help of words given in the box.**

बर्दवान–रेलयान–विश्रामस्थले कदाचित् रात्रौ/आङ्ग्लपरिधानविभूषितः कश्चित् भद्रपुरुषः ____________ (i) अवारोहत्। तस्य पार्श्वे एका पेटिका आसीत् यां वाहयितुं सः ____________ (ii) पश्यन् उवाच "भारवाहक! भारवाहक!" इति। तत्कालमेव एकः ____________ (iii) जनः तत्रागतः तं चापृच्छत् "भवान् किम् इच्छति"? इति! सोऽवदत् 'इमां पेटिकां ____________ (iv) मया सह आगच्छ।" स एवमेव अकरोत्। यदा तौ ____________ (v) बहिरागतौ तदा पेटिकास्वामी तस्मै कतिचित् मुद्राः अयच्छत् परं सः अस्वीकृतवान्। "तर्हि कति मुद्राः वा छसि" इति पृष्टः भारवाहकः गभीरस्वरेण अवदत् धनं तु न इष्टं मया परं एकः ____________ (vi) वर्तते यत् अद्यप्रभृतिः ____________ (vii) भवेत् भवान्। स्वभारं स्वयमेव वहने लज्जितः न भवतु इति। "भारवाहकस्य ____________ (viii) श्रुत्वा विस्मितः भद्रपुरुषः यावदेव समीपे दीपप्रकाशे सध्यानं पश्यति, तावदेव तं ____________ (ix) तस्य चरणयोः पतति। वस्तुतः स भारवाहको न कश्चिदन्यः परं विख्यातनामा श्री ईश्वरचन्द्रः विद्यासागरः एव आसीत् यस्य ____________(x) एव स दूरात् तत्र आगतः आसीत्।

**मञ्जूषा**

| |
|---|
| अनुरोधः, गुरुगम्भीरस्वरं, रेलयानात्, वोढ्वा, परिचीय, साधारणवस्त्रयुक्तः, इतस्ततः दर्शनार्थम्, स्वावलम्बी, विश्रामस्थलात् |

4. **अधोलिखितेषु एकं विषयम् अधिकृत्य पञ्चवाक्यमितम् एकम् अनुच्छेदं संस्कृतेन लिखत।**
**किसी एक विषय पर पांच वाक्यों का संस्कृत में एक अनुच्छेद लिखिए।**
**Write a passage of five sentences in Sanskrit on any one of the following topics.**

$1\times 5 = 5$

(i) मम विद्यालयस्य क्रीडाङ्गणम्।

(ii) क्रिकेट – क्रीडा मया दृष्टा।

(iii) दीपावलि – मेलकम्।

# खण्डः 'ग' Section C

# अनुप्रयुक्तव्याकरणम् **30**

# अनुप्रयुक्त व्याकरण

# Applied Grammar

5. **अधोलिखितेषु वाक्येषु स्थूलाक्षरपदानां सन्धिविच्छेदं कुरुत**

**नीचे लिखे वाक्यों में स्थूलाक्षरपदों में सन्धिविच्छेद कीजिए।**

**Disjoin Sandhis in the bold-typed words in the following sentences** 1 × 6 =6

(i) इदं लेह **(इत्यभिधानेन)** प्रसिद्धं पर्यटनस्थलम्।

(ii) **(कस्मिंश्चित्)** जलाशये त्रयो मत्स्याः प्रतिवसन्ति स्म।

(iii) **एतद्देवस्य** शासनम्।

(iv) **(एष एव)** अङ्गीकरोति उत्तरं दक्षिणं चायनम्।

(v) **(द्वितीयभागस्सञ्चारो)** जलस्यान्तर्बहिः क्रमात्।

(vi) **(निमज्जतीन्दोः)** किरणेष्विवाङ्कः।

6. **अधेलिखितेषु वाक्येषु स्थूलाक्षरपदानां विग्रहाः लेखनीयाः।** 1 × 6 =6

**निम्नलिखित वाक्यों में मोटे अक्षरों में छपे पदों का विग्रह कीजिए।**

**Disjoin Compounds in the bold- lettered words in the following sentences.**

(i) **निरुद्धचेष्टस्य** मे बन्धनमिव राज्यम्।

(ii) न **निष्प्रयोजनं** प्रभुभिः आहूयन्ते अधिकारिणः।

(iii) **दैवहतं** सुरक्षितम् अपि नश्यति।

(iv) भगवान् मरीचिमाली **ब्रह्माण्डभाण्डस्य** दीपकः।

(v) सूर्य एव **अहोरात्रं** जनयति।

(vi) जलाशये **मत्स्यत्रयं** प्रतिवसति।

7. **निम्नलिखितेषु वाक्येषु कोष्ठकान्तर्गतप्रकृतिप्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत।**

**नीचे लिखे हुए वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय को जोड़ कर खाली स्थान भरिए।**

**Rewrite the following sentences by adding suffixes to the roots and words given in the brackets.** 1 × 8 = 8

(i) चाणक्येन कौमुदीमहोत्सवः (प्रति+सिध्+क्त)।

(ii) मत्स्यपूर्णजलाशयं दृष्ट्वा मत्स्यजीविनः (वच्+क्तवतु)।

(iii) सर्वे छात्राः प्रक्षेपकमाध्यमेन यात्रावृत्तं ------ उत्सुकाः अभवन् (दृश् + तुमुन्)

(iv) सर्वसम्पदः परस्परानुकूलेषु नृपमंत्रिषु------कुर्वन्ति। (रम् + क्तिन्)

(v) चारुदत्तः यथाविभवं गृहदैवतान् ------ आगच्छति। (अर्च् + शतृ)

(vi) ---------- मरीचिमालिनः प्रकाशः अरुणः वर्तते। (भग + मतुप्)

(vii) योग्याः जनाः मायाविषु ------ भवन्ति। (माया + इनि)

(viii) ---------- यद्यस्ति किं पातकैः (पिशुन + तल्)

**8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम्।**

**अधोलिखित वाक्यों में कर्ता और क्रिया की अन्विति करें।**

**Please write the suitable verb according to the subject or vice versa in the following sentences.** ( 1 × 5 =5)

(i) लद्दाखस्य प्राकृतिकस्थलानां विषयेऽपि भवती किञ्चित्------। (ब्रवीतु / ब्रूहि)

(ii) ------विमानशास्त्रे त्रिपुरविमानस्य वर्णनं श्रूयताम्। (यूयम्, युष्माभिः)

(iii) श्वः प्रभाते मत्स्यजीविनः अत्र ----- (आगच्छन्, आगमिष्यन्ति)

(iv) तर्हि उपालब्धुं वयम् अत्र ----------। (आहूताः, आहूतवन्तः)

(v) कनकं चतुर्भिः प्रक्रियाभिः----------। (परीक्षते, परीक्ष्यते)

अथवा

**अधोदत्तेषु वाक्येषु मञ्जूषातः चित्वा विशेष्यपदैः सह विशेषणपदानि योजयत।**

**अधोलिखित वाक्यों में विशेषण पद मञ्जूषा से छांट कर विशेष्य पदों के साथ जोड़ें।**

**Match the adjectives with nouns in the following sentences. (The adjective words have been given in the box)**

(i) चन्द्रगुप्तः ------- कुसुमपुरं द्रष्टुमिच्छति स्म।

(ii) मत्स्यजीविनः -------- सरः अपश्यन्।

(iii) शीते ऋतौ लद्दाखप्रदेशे ------- हिमराशिः निपतति।

(iv) -------- पादपाः निपतन्ति।

(v) शालिनी भारतस्य ------- सुश्रुतस्य विषये सभायाम् अभाषत।

**मञ्जूषा**

| |
|---|
| महान्, अतिरमणीयं, सुबद्धमूलाः, प्रमुखचिकित्सकस्य, बहुमत्स्यं |

9. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम्।

नीचे लिखे हुए वाक्यों में कोष्ठक में दिए गए शब्दों के साथ उपपद विभक्ति का प्रयोग करके खाली स्थान भरिए।

**Please fill in the blanks after using suitable ëëUpapada-vibhaktisîí with the words given in the brackets in the following sentences.** 1 × 5 =5

(i) जनाः –––––– प्रति भक्तिभावं दर्शयन्ति (बुद्ध)

(ii) मत्स्यजीविभिः तत्सरः ––––––––––– सह निर्मत्स्यतां नीतः। (यद्भविष्य)

(iii) न ––––––––– अन्तरा चाणक्यः स्वप्नेऽपि चेष्टते। (प्रयोजन)

(iv) स्वभावाद् एव –––––––– उत्सवाः रोचन्ते। (मानव)

(v) अपयशः यदि जीवने, किं ––––––––। (मृत्यु)

## खण्डः 'घ' Section D

## भागः (1) (Part -1)

**35**

## पठितांश–अवबोधनम्

## (Text - Book Comprehension)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत।

नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर दें।

**Answer the questions after reading the following prose passages.** (5)

वयं वर्तमानकाले सङ्गणकस्य प्रयोगं कुर्मः। परन्तु यदि आर्यभटेन शून्यस्य आविष्कारः न कृतः स्यात् तर्हि सङ्गणकभाषायाः जन्म एव न अभविष्यत्, यतः तत्र तु एकं शून्यञ्च द्वे एव संख्ये महत्त्वपूर्णे। अपि च, सूर्यं प्रति पूर्वाभिमुखा पृथिवी 365.25 वारं प्रतिवर्षं भ्रमति। आधुनिकैः वैज्ञानिकैरपि तथैव मन्यते। अपि च यथा नौकायां स्थितः मनुष्यः वृक्षादीन् पृष्ठं प्रति गच्छतः पश्यति, तथैव नक्षत्रादयः भूमध्यरेखास्थितस्य नरस्य कृते पश्चिमं प्रति धावन्तः प्रतीयन्ते।

I. एकपदेन उत्तरत ½ × 2 =1

एक शब्द में उत्तर दें।

**Answer in one word.**

(i) पृथिवी कतिवारं प्रतिवर्षं भ्रमति?

(ii) वर्तमानकाले वयं कस्य प्रयोगं कुर्मः?

II. **पूर्णवाक्येन उत्तरत।** 1 × 1 =1

**पूरे वाक्य में उत्तर दीजिए।**

**Answer in a complete sentence.**

(i) भूमध्यरेखास्थितस्य नरस्य कृते किं प्रतीयते?

III. **निर्देशानुसारं प्रश्नान् उत्तरत** ½ × 2 =1

**निर्देशानुसार प्रश्नों के उत्तर दीजिए।**

**Do as directed**

(i) ''पूर्वाभिमुखा इति पदं कस्य विशेषणम्?

(ii) ''प्राचीनैः'' इति पदस्य कः विलोमः अत्र प्रयुक्तः?

(iii) 'तर्हि संगणकभाषायाः जन्म एव न अभविष्यत्''' इत्यत्र ''अभविष्यत्'' इति क्रियापदस्य कर्ता कः?

(iv) ''ग्रहादय'' इति पदस्य कः पर्यायः अत्र प्रयुक्तः?

**11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत।** 1+ 1=2

**नीचे लिखे नाट्यांश को पढ़कर उत्तर दीजिए।**

**Answer the questions after reading the following Drama passage.**

**(नाट्यांशः)**

**(नेपथ्ये वैतालिकौ काव्यपाठं कुरुतः)** (5)

राजा आर्य वैहीनरे! आभ्यां वैतालिकाभ्यां सुवर्णशतसहस्रं दापय।

चाणक्यः (सक्रोधं) वैहीनरे! तिष्ठ तिष्ठ ! न गन्तव्यम्। किमस्थाने महान् प्रजाधनापव्ययः?

राजा (सक्रोधं) आर्येण एवं सर्वत्र निरुद्धचेष्टस्य मे बन्धनमिव राज्यं, न राज्यमिव।

चाणक्यः वृषल! स्वयम् अनभियुक्तानां राज्ञाम् एते दोषाः सम्भवन्ति।

राजा यद्येवं तर्हि कौमुदीमहोत्सवस्य प्रतिषेधस्य तावत् प्रयोजनं श्रोतुमिच्छामि।

चाणक्यः कौमुदीमहोत्सवस्य आयोजनस्य प्रयोजनं ज्ञातुमिच्छामि।

राजा प्रथमं मम आज्ञायाः पालनम्।

चाणक्यः प्रथमं ममापि तव आज्ञायाः उल्लंघनमेव। अथ अपरमपि प्रयोजनं श्रोतुमिच्छसि, तदपि कथयामि।

राजा कथ्यताम्।

I. **एकपदेन उत्तरत** ½ × 2 =1

**एक शब्द में उत्तर दीजिए।**

**Answer in one word.**

(i) कौमुदीमहोत्सवः केन प्रतिषिद्धः?

(ii) वैतालिकौ कुत्र काव्यपाठं कुरुतः?

II. **पूर्णवाक्येन उत्तरत** 1×1 =1

**पूरे वाक्य में उत्तर दीजिए।**

**Answer in one Sentence.**

चाणक्यस्य मते वैतालिकाभ्यां शतसहस्रसुवर्णस्य दानं किम् अस्ति?

III. **निर्देशानुसारं उत्तरत** ½ +½+1+1=3

**निर्देश के अनुसार उत्तर दीजिए।**

**Do as directed**

(i) ''प्रथम मम आज्ञायाः पालनम्'' इत्यत्र ''मम'' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(ii) ''व्ययः'' इत्यस्य पदस्य कः विलोमः अत्र प्रयुक्तः?

(iii) ''यद्येवं .................. श्रोतुम् इच्छामि'' इत्यत्र ''इच्छामि'' इति क्रियापदस्य कर्ता कः?

(iv) ''तिरस्करणं'' इति पदस्य कः पर्यायः अत्र प्रयुक्तः?

12. **अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत।** 1+ 1=2

**नीचे लिखे पद्यांश को पढ़कर उत्तर दीजिए।**

**Answer the questions after reading the following poetry passage.**

भागत्रयं भवेदस्य त्रिपुरस्य यथाक्रमम्।
तेषु प्रथमभागस्य सञ्चारः पृथिवीतले,
द्वितीयभागस्सञ्चारो जलस्यान्तर्बहिः क्रमात्।
तृतीयभागस्सञ्चारस्त्वन्तरिक्षे भवेत् स्वतः।।

I. **एकपदेन उत्तरत** ½ × 2 =1

**एक पद में उत्तर दीजिए।**

**Answer in one word.**

(i) प्रथमभागस्य सञ्चारः कुत्र स्यात्?

(ii) अत्र कस्य वर्णनं कृतम्?

II. **पूर्णवाक्येन उत्तरत।** 1 × 1 =1

**पूरे वाक्य में उत्तर दीजिए।**

**Answer in one Sentence.**

जलस्यान्तर्बहिः कस्य भागस्य सञ्चारो भवेत्?

III. **यथानिर्देशम् उत्तरत** ½ + ½ + 1+1 =2

**निर्देश के अनुसार उत्तर दीजिए।**

**Answer as directed**

(i) ''आकाशे' इति पदस्य कः विलोमः अत्र प्रयुक्तः?

(ii) ''भवेदस्य'' इत्यस्मिन् 'अस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(iii) ''क्रमशः'' इति पदस्य कः पर्यायः अत्र प्रयुक्तः?

(iv) ''तृतीयभागस्सञ्चारस्त्वन्तरिक्षे भवेत् स्वतः'' इत्यस्मिन् वाक्ये सञ्चारः इति कर्तृपदस्य किं क्रियापदं प्रयुक्तम्?

**13.** I. **निर्देशानुसारं प्रश्नान् उत्तरत** 1+1 = 2

**निर्देश के अनुसार प्रश्नों के उत्तर दीजिए।**

**Do as Directed**

**''एष भगवान् माणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य''।**

(अ) एषा पङ्क्तिः कस्मात् ग्रंथात् संकलिता?

(आ) अस्य ग्रन्थस्य लेखकः कः?

II. **अधोदत्तः वाक्यांशः केन कं प्रति उक्तः?** 1+1 = 2

**निम्नलिखित वाक्यांश किसने किसे कहा है?**

**Who has spoken the following "Vakyansa" and to whom?**

''अशक्तैः बलिनः शत्रोः कर्तव्यं प्रपलायनम्''।

**14.** **अधोलिखितस्य श्लोकद्वयस्य प्रदत्तभावार्थं म जूषातः उचितपदैः पूरयित्वा लिखत।**

**निम्नलिखित दो श्लोकों का भावार्थ दिया गया है। म जूषा की सहायता से उचित पदों से भर कर लिखिए।**

**The explanation of two shlokas has been given. Fill in the blanks with the help of words given in the box.** 2+2=4

I. सुखं हि दुःखान्यनुभूयशोभते

यथान्धकारादिव दीपदर्शनम्

सुखात्तु यो याति दशां दरिद्रतां,

स्थितः शरीरेण मृतः स जीवति।

यथा अन्धकारात् निर्गम्य दीपस्य प्रकाशस्य दर्शनं (i) --------------भवति, एवमेव दुखानां पश्चात् सुखस्य आगमनं शोभनं भवति किन्तु (ii) ---------------------------- जीवने सहसा वज्रपातमिव (iii) -------------- अनुभवः तु साक्षात् (iv) -------------- असहनीयः एव।

II. उत्तिष्ठत जाग्रत, प्राप्य वरान् निबोधत

क्षुरस्य धारा निशिता दुरत्यया

दुर्गं पथस्तत् कवयो वदन्ति।

हे जनाः यूयं (i) -------------- त्यक्त्वा ज्ञानं प्राप्तुं तत्पराः भवत। (ii) -------------- समीपे गत्वा ज्ञानं प्राप्तुं प्रयत्नं कुरुत। यथा (iii) ------------------- तीक्ष्णा धारा पद्भ्यां अनुल्लङ्घनीया तथैव (iv) -------- ज्ञानमार्गम् अतीव कठिनं वदन्ति।

**मञ्जूषा**

| |
|---|
| महापुरुषाणाम्, छुरिकायाः, अज्ञाननिद्राम्, सुखदं, ऐश्वर्यशालिनि, दारिद्र्यस्य, महापुरुषाः मरणमिव |

**15. अधोलिखितस्य श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत।** 2+2=4

**नीचे दो श्लोकों का अन्वय दिया गया है। उनमें रिक्त स्थानों की पूर्ति करके अन्वय पुनः लिखिए।**

**The prose-order-renderings of the following two shlokas have been given below. Fill in the blanks and rewrite the prose order.**

(i) व्रजन्ति ते मूढधियः पराभवं, ½ × 4=2

भवन्ति मायाविषु ये न मायिनः।

प्रविश्य हि घ्नन्ति शठास्तथाविधा

नसंवृताङ्गान्निशिता इवेषवः।।

**अन्वयः**

ते मूढधियः (i)——————ब्रजन्ति, ये मायाविषु (ii)———— न भवन्ति।हि शठाः तथाविधान् (iii)——————— (जनान्) निशिता (iv)——————इव घ्नन्ति।

(ii) अनन्तरत्नप्रभवस्य यस्य,
हिमं न सौभाग्यविलोपि जातम्,
एको हि दोषो गुणसन्निपाते,
निमज्जतीन्दोः किरणेष्विवाङ्कः ।।

**अन्वयः**

यस्य (i) —————— हिमम् (ii)—————— न जातम्। हि (iii) ————— एकः दोषः इन्दोः (iv)————— अङ्कः इव निमज्जति।

**16. अधोलिखितानां 'क' स्तम्भस्य वाक्यांशानां ''ख''स्तम्भस्य वाक्यांशैः सह उचितमेलनं कुरुत।**

**निम्नलिखित 'क' स्तम्भ में प्रदत्त वाक्यांशों का ''ख'' स्तम्भ में दिए गए वाक्यांशों के साथ उचित मिलान कीजिए।**

**Match the sentences of column 'क' with those of column ''ख''** 1×4=4

| स्तम्भ ''क'' | स्तम्भ ''ख'' |
|---|---|
| (i) येन आक्रमन्त्यृषयः आप्तकामाः | अ) तर्हि चतुर्गुणेन सीसेन शोधयेत। |
| (ii) यदि स्वर्णम् अशुद्धं भवेत्। | ब) न उत्सवकालः। |
| (iii) स्टाकप्लेस संग्रहालये | स) यत्र तत् सत्यस्य परं निधानम्। |
| (iv) सोऽयं व्यायामकालो | द) सप्तसप्ततिः कक्षाः सन्ति। |

**17. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत।**

**निम्नलिखित वाक्यों में रेखाङ्कित शब्दों के प्रसङ्गानुसार उचितार्थ कोष्ठकों से चुन कर लिखिए।**

**Write the meanings of the bold-typed words which are suitable to the context). Select the words from the brackets.** 1×4=4

(i) एष भगवान् मरीचिमाली चक्रवर्ती **खेचरमण्डलस्य।** (नक्षत्रमण्डलस्य, पक्षिसमूहस्य, राक्षसगणस्य)

(ii) इदानीं **दुर्गसंस्कारः** कर्तव्यः। (दुर्गस्य सुरक्षादिकार्यं, दुर्गसंबंधी–उत्सवः, दुर्गस्य शोभाभिवृद्धये प्रसाधनम्)

(iii) एतादृशैः जनैः राजा **तृणवत्** गण्यते। (शष्पखण्डमिव, महत्त्वपूर्णः, तुच्छः इव)

(iv) अरक्षितं तिष्ठति **दैवरक्षितम्।** (स्वामिरक्षितम्, भाग्यरक्षितम्, देवतारक्षितम्)

## खण्डः 'घ' Section D

## भागः (II) (Part II)

## संस्कृतसाहित्यपरिचयः

## (General Introduction to Sanskrit Literature)

**18. अधोलिखितानां कवीनां देशकालकृतीनां यथानिर्देशं नामानि लिखत।** 10

**निम्नलिखित कवियों के देश, समय और रचनाओं के नाम निर्देशानुसार लिखिए।**

**Write the names of the place, time and works of the following poets, as per instructions.**

I. कवयः

(i) अम्बिकादत्तव्यासः

(ii) भर्तृहरिः — देशः — $1 \times 3 = 3$

(iii) भासः

II. कवयः

(i) भर्तृहरिः

(ii) विशाखदत्तः — कालः — $1 \times 3 = 3$

(iii) अम्बिकादत्तव्यासः

III. कवयः

(i) वराहमिहिरः

(ii) कौटिल्यः — काऽपि एका रचना — $1 \times 4 = 4$

(iii) विष्णुशर्मा

(iv) भारविः

**अथवा (OR)**

**अ. निम्नलिखितवाक्येषु कोष्ठकेभ्यः चित्वा उचितशब्दैः रिक्तस्थानपूर्तिः क्रियताम्।**

**निम्नलिखित वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्त स्थान पूर्ति कीजिए।**

**Fill in the blanks in the following sentences with the suitable words. (Select the words from the brackets).** $(1 \times 5 = 5)$

(i) नाटकस्य आरम्भे विघ्नविनाशाय देवानां स्तुतिः ——— भवति। (आत्मगतम्, भरतवाक्यं, नान्दी)

(ii) ——————— गद्यकाव्यस्य भेदः अस्ति। (रूपकं, आख्यायिका, स्तोत्रं)

(iii) क चुकी राजभवनस्य ——————— वर्तते। (सन्देशवाहकः, वृद्धसेवकः, राजपुरोहितः)

(iv) महाकाव्यं —————————— भेदः भवति। (पद्यकाव्यस्य, गद्यकाव्यस्य, नाटकस्य)

(v) गद्यपद्यमयं काव्यं —————————— उच्यते। (महाकाव्यम्, नाटकम्, चम्पू)

**आ. संस्कृतमहाकाव्यस्य प च विशेषताः संस्क तेन लिखत** 5

**संस्कृतमहाकाव्य की किन्हीं पाँच विशेषताओं को संस्कृत में लिखिए।**

**Write five characteristics of Mahakavya in Sanskrit.**

# आदर्श प्रश्नपत्रम् सं. 2
# (अङ्कयोजना) Marking Scheme
# कोड संख्या –022
# (संस्कृतकेन्द्रिकम्)
# कक्षा द्वादशी

अवधिः होरात्रयम् | पूर्णाङ्काः : 100
समय : तीन घण्टे | पूर्णाङ्क : 100
Time : 3 Hours | Maximum Marks : 100

## खण्ड "क" Section A
## अपठितांश–अवबोधनम् 10

**अस्मिन् खण्डे 50 शब्दानाम् एकः सरलः अपठितः गद्यांशः अस्ति।**

**प्रश्नाः**

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केतः | अङ-विभागः |
|---|---|---|---|---|---|
| 1. I. | तथ्यबोधपरीक्षणम् | अतिलघूत्तरः एकपदेन | (i) धनस्य<br>(ii) आश्रमवासी<br>(iii) मसी<br>(iv) बहिः | ½<br>½<br>½<br>½ | 2 |
| II. | तथ्यबोधपरीक्षणम् | लघूत्तरः पूर्णवाक्येन | (i) अस्माकं समीपे आवश्यकतानुसारम् एव धनं, वस्त्राणि च अन्यवस्तूनि भवेयुः<br>(ii) आश्रमवासिना महात्मनः लेखनी क्षिप्ता यतः तस्यां मसी न आसीत् | 1<br>1 | 2 |
| III. | भाषिकतत्त्वप्रयोग–परीक्षणम् | अतिलघूत्तरः एकपदेन | (i) विशेष्यपदचयनम् – वस्तु<br>(ii) कर्तृपदचयनम् – भवान्<br>(iii) विलोमपदचयनम् – बहिः<br>(iv) पर्यायचयनम् – अचिरात् | 1<br>1<br>1<br>1 | 4 |

| | | | | |
|---|---|---|---|---|
| IV. | शीर्षक प्रदानम् | अतिलघूत्तरः | (i) क्षुद्रवस्तुनः महत्त्वम् अथवा क्षद्रुवस्तुमहत्त्वम्<br>(ii) महात्मागान्धिनः लेखनी<br>(iii) अपरिग्रहस्य महत्त्वम् | 2<br>**10** |

## खण्डः 'ख'' Section B
## (संस्कृतेन रचनाकार्यम्)

अस्मिन् खण्डे त्रयः प्रश्नाः सन्ति। प्रथमप्रश्ने लिखिते पत्रे म जूषातः चित्वा विभिन्नरिक्तस्थानानां पूर्तिः करणीया। दशरिक्तस्थानानि सन्ति। प्रतिशुद्धरिक्तस्थानपूर्तिकृते अर्ध : अङ्कः निर्धारितः। ½

| **क्रमाङ्कः** | **उद्देश्यम्** | **प्रश्नप्रकारः** | **अपेक्षित–उत्तराणि** | **अङ्क-सङ्केतः** | **अङ-विभागः** |
|---|---|---|---|---|---|
| 2 | पत्रलेखने औपचारिककार्य–परीक्षणम् | यस्मात् नगरात् पत्रं प्रेषितं तस्य नाम | (i) कानपुरतः | ½ | |
| | | पत्र प्रेषकस्य अभिधानम् | (ii) अपूर्व | ½ | |
| | | यस्य कृते पत्रं प्रेषितं तस्य अभिधानम् (सम्बोधनं) | (iii) प्रतिनिधित्वम् | ½ | |
| | | पत्रसंकेते यत्र पत्रं प्रेष्यते तस्य स्थानस्य नाम | (iv) अकरवम् | ½ | 2 |
| | पत्र लेखने विषयवस्तु परीक्षणम् | संदर्भानुकूलं विषयवस्तुज्ञानम् (रिक्तस्थानपूर्ति) | (iv) वर्धितम् | ½ | |
| | | | (vi) विकासेन | ½ | |
| | | | (vii) अभूतपूर्वं | ½ | |
| | | | (viii) एतादृशीसु | ½ | 3 |
| | | | (ix) आलोकः | ½ | |
| | | | (x) पश्चिमबंगप्रदेशः | ½ | |
| | | | | | **5** |

3. अस्मिन् प्रश्ने प्रदत्तायां कथायां सन्दर्भानुकूलरिक्तस्थानपूर्तिः अपेक्षिता। अत्र दश रिक्तस्थानानि सन्ति। प्रतिशुद्धरिस्थानपूर्तिकृते (½) अर्धः अङ्कः निर्धारितः।

| | | | | |
|---|---|---|---|---|
| | कथायां सन्दर्भानुकूलं रिक्तस्थान–पूर्तिः, शब्दप्रयोगपरीक्षणम् | (i) रेलयानात्<br>(ii) इतस्ततः<br>(iii) साधारणवस्त्रयुक्तः<br>(iv) वोढ्वा<br>(v) विश्रामस्थलात्<br>(vi) अनुरोधः<br>(vii) स्वावलम्बी<br>(viii) गुरूगंभीरस्वरं<br>(xi) परिचीय<br>(x) दर्शनार्थम् | ½<br>½<br>½<br>½<br>½<br>½<br>½<br>½<br>½<br>½ | (5) |

4. कमपि एकं विषयम् अधिकृत्य प चवाक्येषु लेखनम् अपेक्षितम्। प्रतिवाक्यम् एकः अङ्कः निर्धारितः। अर्धः अङ्कः शुद्धतथ्यकृते अर्धः च शुद्धभाषाप्रयोगाय।

| | | | | |
|---|---|---|---|---|
| अवबोधपूर्वकम् वाक्यसंरचना–परीक्षणम् | वाक्यनिर्माणम् | पञ्च वाक्यानि | ½ + ½<br>½ + ½<br>½ + ½<br>½ + ½<br>½ + ½ | 1<br>1<br>1<br>1<br>1 |

**5**

# खण्डः ग' Section C
# अनुप्रयुक्तव्याकरणम्

**(अस्मिन् खण्डे भाषायाः व्यावहारिकप्रयोगः अपेक्षितः)**

**प्रश्नाः**

| क्रमांङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 5 | वाक्येषु पाठाधरित–सन्धिविच्छेदः | अनुप्रयोगात्मकः कोष्ठकान्तर्गतानां पदानां सन्छिच्छेदः बोधपरकः अतिलघूत्तरः | (i) इति+अभिधानेन<br>(ii) कस्मिन् + चित्<br>(iii) एतत् + देवस्य<br>(iv) एषः+एव<br>(v) द्वितीयभागः+ स चारः<br>(vi) निमज्जति+इन्दोः | 1<br>1<br>1<br>1<br>1<br>1 | 6 |

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 6 | वाक्येषु समस्त–पदानां विग्रह–दक्षतापरीक्षणम् | वाक्येषु स्थूलाक्षर–पदानां विग्रहः | (i) निरुद्धा चेष्टा यस्य तस्य(मम)<br>(ii) प्रयोजनस्य अभावः<br>(iii) दैवेन हतम्<br>(iv) ब्रह्माण्डम् एव भाण्डम् तस्य<br>(v) अहश्च रात्रिश्च<br>(vi) त्रयाणां मत्स्यानां समाहारः | 1<br>1<br>1<br>1<br>1<br>1 | 6 |
| 7 | वाक्येषु कृदन्त–पदानां प्रयोग–परीक्षणम् | प्रकृतिप्रत्ययौ योजयित्वा वाक्य–संदर्भानुसारं रिक्तस्थानपूर्तिः | (i) प्रतिषिद्धः<br>(ii) उक्तवन्तः<br>(iii) द्रष्टुम्<br>(iv) रतिम्<br>(v) अर्चयन्<br>(vi) भगवतः<br>(vii) मायिनः<br>(viii) पिशुनता | 1<br>1<br>1<br>1<br>1<br>1<br>1<br>1 | 8 |
| 8 | कर्तृ–क्रियापद–अन्विति–परीक्षणम् | वाक्येषु रिक्त–कोष्ठकात् समुचितं पदं विचित्य पूर्त्तिः | (i) ब्रवीतु<br>(ii) युष्माभिः<br>(iii) आगमिष्यन्ति<br>(iv) आहूताः<br>(v) परीक्ष्यते | 1<br>1<br>1<br>1<br>1 | 5 |
| 8(वैकल्पिक) | विशेषणपद–चयनपरीक्षणम् | म जूषातः विशेषण–पदचयनं रिक्तस्थान पूर्तिः | (i) अतिरमणीयं<br>(ii) बहुमत्स्यं<br>(iii) महान्<br>(iv) सुबद्धमूलाः<br>(v) प्रमुखचिकित्सकस्य | 1<br>1<br>1<br>1<br>1 | 5 |
| 9 | उपपदविभक्ति–प्रयोगपरीक्षणम् | कोष्ठकात् शब्देषु उपपदविभक्ति–प्रयोगेण रिक्तस्थानपूर्तिः | (i) बुद्धं<br>(ii) यद्भविष्येण<br>(iii) प्रयोजनम्<br>(iv) मानवेभ्यः / मानवाय<br>(v) मृत्युना | 1<br>1<br>1<br>1<br>1 | 5 |
| | | | | **Total** | **30** |

# खण्डः घ
# पठितांश–अवबोधनम्
## (अस्मिन् खण्डे सर्वे प्रश्नाः पाठ्यपुस्तकम् आधारिताः)
## (ऋतिका – द्वितीयः भागः)

**प्रश्नाः**

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 10 | पठितगद्यांश–बोधपरीक्षणम् | 1. अतिलघूत्तरः एकपदेन उत्तरम् | (i) 365.25 वारं | ½ | 1 |
| | | | (ii) सङ्गणकस्य | ½ | |
| | | 2. लघूत्तरः पूर्णवाक्येन उत्तरम् | (i) भूमध्यरेखास्थितस्य नरस्य कृते नक्षत्रादयः पश्चिमं प्रति धावन्तः प्रतीयन्ते। | 1 | 1 |
| | भाषिकतत्त्व–परीक्षणम् | 3. अतिलघूत्तरः | | | |
| | | (i) विशेष्यपदचयनम् | (i) ''पृथ्वी'' इति पदं विशेष्यम् | ½ | |
| | | (ii) विलोम्चयनम् | (ii) आधुनिकैः | ½ | |
| | | (iii) कर्तृपदचयनम् | (iii) जन्म | 1 | |
| | | (iv) पर्यायपदस्य | (iv) नक्षत्रादयः | 1 | 3 |
| | | | | | **5** |
| 11 | पठितनाट्यांशस्य बोधपरीक्षणम् | 1. अतिलघूत्तरः (एक पदेन) | (i) चाणक्येन | ½ | |
| | | | (ii) नेपथ्ये | ½ | 1 |
| | | 2. लघूत्तरः पूर्णवाक्येन उत्तरम् | (i) निरुद्धचेष्टा–कारणात् चाणक्यस्य मते वैतालिकाभ्यां शतसहस्त्र–सुवर्णदानम् अस्थाने प्रजाधनापव्ययः अस्ति | 1 | 1 |

| क्रमांङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| | भाषिकतत्त्व–प्रयोगपरीक्षणम् | 3. अतिलघूत्तरः | | | |
| | | (i) सर्वनामस्थाने संज्ञाप्रयोगः | (i) राज्ञः कृते / राज्ञे | ½ | |
| | | (ii) विलोमचयनम् | (ii) अपव्ययः | ½ | |
| | | (iii) कर्तृपदचयनम् | (iii) राजा | 1 | |
| | | (iv) पर्यायपदस्यचयनम् | (iv) उल्लंघनम् | 1 | 3 |
| | | | | | **5** |
| 12 | पठितपद्यांश–बोधपरीक्षणम् | 1. अतिलघूत्तरः एकपदेन उत्तरम् | (i) पृथिवीतले | ½ | |
| | | | (ii) त्रिपुरस्य (विमानस्य) | ½ | 1 |
| | | 2. लघूत्तरः पूर्णवाक्येन उत्तरम् | जलस्यान्तर्बहिः द्वितीय–भागस्य सञ्चारो भवेत् | 1 | 1 |
| | भाषिकतत्त्व–प्रयोगपरीक्षणम् | 3. अतिलघूत्तरः एक पदेन | | | |
| | | (i) विलोमचयनम् | (i) पृथिवीतले | ½ | |
| | | (ii) सर्वनामस्थाने संज्ञा चयनम् | (ii) त्रिपुरस्य कृते / त्रिपुराय | ½ | |
| | | (iii) पर्यायचयनम् | (iii) यथाक्रमम् | 1 | |
| | | (iv) क्रियापदचयनम् | (iv) भवेत् | 1 | 3 |
| | | | | | **5** |
| 13 | उद्धृत–अंशस्य प्रसङ्गसन्दर्भ–ग्रन्थलेखक–परीक्षणम् | अतिलघूत्तरः | (i) (अ) शिवराजविजयात् | 1 | 2 |
| | | | (आ) श्री अम्बिकादत्तव्यासः | 1 | |
| | | | (ii) अनागतविधाता | 1 | 2 |
| | | | अन्यमत्स्यान् | 1 | **4** |

| क्रमांङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 14. | भावार्थबोध–परीक्षणम् | रिक्तस्थानपूर्ति–माध्यमेन | 1. (i) सुखदं | ½ | |
| | | | (ii) ऐश्वर्यशालिनि | ½ | |
| | | | (iii) दारिद्र्यस्य | ½ | 2 |
| | | | (iv) मरणमिव | ½ | |
| | | | 2. (i) अज्ञाननिद्राम् | ½ | |
| | | | (ii) महापुरुषाणाम् | ½ | |
| | | | (iii) छुरिकायाः | ½ | |
| | | | (iv) महापुरुषाः | ½ | 2 [4] |
| 15. | पद्यस्य अन्वयबोध–परीक्षणम् | प्रदत्तेषु अन्वयेषु श्लोकं पठित्वा रिक्तस्थानपूर्तिः | 1. (i) पराभवं | ½ | |
| | | | (ii) मायिनः | ½ | |
| | | | (iii) असंवृत्ताङ्गान् | ½ | |
| | | | (iv) इषवः | ½ | 2 |
| | | | 2. (i) अनन्तरत्नप्रभवस्य | ½ | |
| | | | (ii) सौभाग्यविलोपि | ½ | |
| | | | (iii) गुणसन्निपाते | ½ | |
| | | | (iv) किरणेषु | ½ | 2 [4] |
| 16. | वाक्यांशानां सार्थकसंयोजनम् | सार्थकमेलनं (संयोजनम्) | 1. (i) यत्र तत् सत्यस्य परं निधानम् | 1 | |
| | | | (ii) तर्हि चतुर्गुणेन सीसेन शोधयेत | 1 | |
| | | | (iii) सप्तसप्ततिः कक्षाः सन्ति | 1 | |
| | | | (iv) न उत्सवकालः | 1 | [4] |
| 17. | प्रसङ्गानुसारं शब्दार्थबोध–परीक्षणम् | प्रदत्तविकल्पेभ्यः शुद्ध–अर्थ चयनम् | (i) नक्षत्रमण्डलस्य | 1 | |
| | | | (ii) दुर्गस्य सुरक्षादिकार्यम् | 1 | |
| | | | (iii) तुच्छ इव | 1 | |
| | | | (iv) भाग्यरक्षितम् | 1 | 4 |

## खण्डः घ, भाग II
## संस्कृतसाहित्यपरिचयः **10**

| क्रमांङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क–सङ्केताः | अङ्क–विभागः |
|---|---|---|---|---|---|
| 18. | संस्कृतसाहित्यस्य | अ) कविः | | | |
| | सामान्यज्ञानम् | (i) अम्बिकादत्तव्यासः | (i) जयपुरम् | 1 | |
| | (अतिलघूत्तरः) | (ii) भर्तृहरिः | (ii) उज्जयिनी | 1 | |
| | (केवलं नामोल्लेखः | (iii) भासः | (iii) पद्मनाभपुरम् | 1 | 3 |
| | अपेक्षितः) | | | | |
| | (आ) | (i) भर्तृहरिः | (i) षष्ठीशताब्दी | 1 | |
| | | (ii) विशाखदत्तः | (ii) 5–6 शताब्दी | 1 | |
| | | (iii) अम्बिकादत्तव्यासः | (iii) एकोनविंशतिःशताब्दी | 1 | 3 |
| | (इ) | (i) वराहभिहिरः | (i) बृहत्संहिता | 1 | |
| | | (ii) कौटिल्यः | (ii) अर्थशास्त्रम् | 1 | |
| | | (iii) विष्णुशर्मा | (iii) पंचतन्त्रम् | 1 | |
| | | (iv) भारविः | (iv) किरातार्जुनीयम् | 1 | 4 |
| | | अथवा | | | **10** |
| अ | संस्कृतसाहित्यस्य | अतिलघूत्तरः | अ) (i) नान्दी | 1 | |
| | सामान्यज्ञानम् | (रिक्तस्थानपूतिः) | (ii) आख्यायिका | 1 | |
| | | | (iii) संदेशवाहकः | 1 | |
| | | | (iv) पद्यकाव्यस्य | 1 | |
| | | | (v) चम्पू | 1 | |
| | | | | | **5** |
| आ | संस्कृतमहाकाव्य–लक्षणबोध–परीक्षणम् | संस्कृतेन पञ्चवाक्येषु वैशिष्ट्यलेखनम् | (i) न्यूनतमाः अष्टसर्गाः | 1 | |
| | | | (ii) धीरोदात्तः नायकः | 1 | |
| | | | (iii) सर्गबद्धः कथानकः | 1 | |
| | | | (iv) धर्मार्थकाममोक्षेषु एकं फलम् | 1 | |
| | | | (v) कोऽपि एकः प्रमुखः रसः | 1 | **5** |
| | | | | | **10** |

# संस्कृत आदर्श प्रश्नपत्रम्
# केन्द्रिकम् (Core)
# कक्षा – द्वादशी XII
# प्रश्नपत्रस्य रूपरेखा

कोड सं. : 322 पूर्णाङ्काः 100

| खण्ड नाम | प्रश्न संख्या | प्रश्न–उद्देश्यम् | प्रश्न प्रकारः | अङ्कसङ्केतः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| खण्डः क अपठितांश–अवबोधनम् | 1 अ<br>ब<br>स<br>द | तथ्यबोध–परीक्षणम्<br>„<br>भाषिकतत्त्वबोध–परीक्षणम्<br>शीर्षक प्रदानम् | अतिलघूत्तरः<br>लघूत्तरः<br>अतिलघूत्तरः<br>„ | ½ × 4 = 2<br>1 × 2 = 2<br>1 × 4 = 4<br>2 = 2 | 10 |
| खण्डः 'ख' रचनात्मकः कार्यम् | 2 | पत्रलेखने अनौपचारिककार्य–विषयवस्तुबोधरीक्षणम् | रिक्तस्थानपूर्ति (अतिलघूत्तरः) | ½ × 10 | 5 |
| | 3 | अवबोधपूर्वकम् वाक्यसंरचनाप्रयोग–परीक्षणम् | रिक्तस्थानपूर्ति (अतिलघूत्तरः) | ½ × 10 | 5 |
| | 4 | अवबोधपूर्वकम् वाक्यनिर्माणम् | (लघूत्तरः) | ½ × 10 | 5<br>15 |
| खण्डः 'ग' अनुप्रयक्त–व्याकरणम् | 5 | वाक्येषु सन्धिच्छेद–परीक्षणम् | अनुप्रयोगात्मकः (अतिलघूत्तरः) | 1 × 6 | 6 |
| | 6 | वाक्येषु समस्तपदानां विग्रहः | स्थूलाक्षर–पदानां विग्रहः (अतिलघूत्तरः) | 1 × 6 | 6 |

| खण्ड नाम | प्रश्न संख्या | प्रश्न–उद्देश्यम् | प्रश्न प्रकारः | अंङ्कसङ्केतः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| खण्डः 'ग' अनुप्रयक्त–व्याकरणम् | 7 | वाक्येषु कृदन्त–तद्धित–प्रत्ययानां प्रयोग–परीक्षणम् | प्रकृति–प्रत्यय–योगेन रिक्त–स्थानपूर्ति' (अतिलघूत्तरः) | 1 × 8 | 8 |
| | 8<br>अथवा | कर्तृ–क्रियापद–अन्विति परीक्षणम्<br>विशेषण पदचयन–परीक्षणम् | शुद्ध क्रियापद–चयनेन रिक्त–स्थानपूर्तिः मंजूषातः विशेषणपदचयनं कृत्वा रिक्तस्थान–पूर्तिः (अतिलघूत्तरः) | 1 × 5<br>अथवा<br>1 × 5 | 5 |
| | 9 | उपपदविभक्तिप्रयोग–परीक्षणम् | कोष्ठकात्–शब्देषु उपपद–विभक्ति प्रयोगेण रिक्तस्थानपूर्तिः (लघूत्तरः) | 1 × 5 | 5<br>30 |
| खण्डः 'घ' भाग : 1 पठितांश–अवबोधनम् | 10 | पठितगद्यांशबोध – परीक्षणम् | अतिलघूत्तरः लघूत्तरः च | ½ × 2 = 1<br>1 × 1 = 1<br>1 × 3 = 3 | 5 |
| | 11 | पठितनाट्यांशबोध् परीक्षणम् | अतिलघूत्तरः लघूत्तरः च | ½ × 2 = 1<br>1 × 1 = 1<br>1 × 3 = 3 | 5 |
| | 12 | पठितपद्यांशबोध् परीक्षणम् | अतिलघूत्तरः लघूत्तरः च | ½ × 2 = 1<br>1 × 1 = 1<br>1 × 3 = 3 | 5 |
| | 13 | प्रसंग–सन्दर्भ–ग्रन्थ–लेखक परीक्षणम् | 1. सन्दर्भग्रन्थस्य लेखकस्य च<br>2. कः कथयति कं कथयति | 1 + 1 = 2<br>1 + 1 = 2 | 4 |

| खण्ड नाम | प्रश्न संख्या | प्रश्न–उद्देश्यम् | प्रश्न प्रकारः | अंङ्कसङ्केतः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| | 14 | भावार्थबोध परीक्षणम् | अतिलघूत्तरः रिक्तस्थानपूर्तिः | ½ × 8 | 4 |
| | 15 | अन्वय परीक्षणम् | अतिलघूत्तरः रिक्तस्थानपूर्तिः माध्यमेन | 2 + 2 | 4 |
| | 16 | सार्थक वाक्य–संयोजन परीक्षणम् | अतिलघूत्तरः वाक्यानां क्रमानुसारं संयोजनम्, | 1 × 4 | 4 |
| | 17 | प्रसंगानुसारम् अर्थचयनम् | अतिलघूत्तरः शुद्धशब्दार्थ चयनम् | 1 × 4 | 4<br>35 |
| खण्डः 'घ'<br>भाग : 2<br>संस्कृत–साहित्य सामान्य परिचयः | 18 | संस्कृतसाहित्यसामान्य बोधपरीक्षणम्<br>अथवा<br>संस्कृतनाट्यवैशिष्ट्य बोधपरीक्षणम् | अतिलघूत्तरः (देश–काव्य–कृति कवीनाम्)<br>अथवा<br>अतिलघूत्तरः | 3 + 3 + 4<br><br>5 + 5 | 10<br><br>10<br>100 |